This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2736

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
सदाचार स्मृतिसटीक	व्यास	वेदांग	पूर्ण		5/10	36	संस्कृत	कागद	14	37		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथसदाचारस्मृतिसटीकप्रारंभः श्रीवेदव्यास॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीमदानंदतीर्थगुरुभ्यो नमः श्रीवेदव्यासायनमः ॐ ध्यायन्श्रीरामलगुरुमादिंचपर
१ मंगुरुं देवतां वासुदेवं च व्याकुर्वेमध्ववाकृतति १ इह सज्जनवर्गमुद्दिधीर्षुः कृपयावदा
रता दिशास्त्राणांमुख्यतासर्यार्थप्रतिपादिकेग्रंथान्विधायसदाचारस्मृत्युक्तंसंक्षेपेणवि
जिज्ञापइषुः तस्यइतिकर्तव्यतांसन्नयन्नधिकार्यादिकंच ध्वनयन्नाचार्याः शिष्यशिक्षा
र्थंस्वेष्टदेवतास्तुतिरूपंमंगलंकुर्वन्नाग्रथादौनिबध्नाति अत्रयातीतिक्रियापदवलात्
सज्जनवर्गइतिकर्तृपदमध्याहार्यं अस्मानंस्वशरीरस्थंविष्णुंअधिगत्यंच्युतसैः सर्वा[illegible]न
यस्मिन्सर्वाणिकर्माणिसन्न्यस्याध्यात्मचेतसा निराशीर्निर्ममो
यातिपरंजयतिसोच्युतः १ स्मृत्वाविष्णुंसमुत्थायकृतशौचोयथा
विधि धौतदंतः समाचम्यस्नानंकुर्याद्विधानतः २ श्रीरामचं०
धिकेपरमात्मनिचेतइतिवा तेनहरिरेवमुख्यकर्तातिस्मरणं याजीवस्याप्यमुख्यकर्तृता
तेनकृतानिकारितानितत्तुजातमकानि सर्वाणिनित्यनैमित्तिकानिसांगानिचकर्मा
णिइहग्रंथेवक्ष्यमाणानि निराशीः हरिभक्त्यादिभिन्ननिषिद्धकामहीनः निर्ममः
भ्रात्रापादितकर्मादौस्वस्वामिभावंच निराकृतेत्यर्थः यस्मिन्हरौसन्न्यस्यसम १
र्प्यपरंकर्मात्स्वयोग्यंपूर्णज्ञानद्वारापूर्णंहरिंयाति सोच्युतः सकलगुणपूर्णोनिर्दो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षोहरिजयतीत्यन्वयार्थः नाहंकर्ताहरिः कर्त्तातत्पूजाकर्मचाखिलं तथापिमत्कृतापूजा
तत्प्रसादेननान्यथा तद्भक्तिस्तत्फलंमह्यंतत्प्रसादः पुनःपुनः कर्मन्यासोहरादेवंविष्णोस्त
पिकुरः सदेतिवचनात् १ आचारस्येतिकर्तव्यतांवक्तुंप्रातरादयारभ्यमाह विष्णुस्वदेहप्रति
ष्ठितंजाग्रदादिपदैर्हरिंस्मृत्वा स्मारंस्मारंशयनादुत्थायसम्यगाचम्यपुनर्गजेंद्रमोक्षणदधि
मर्वोनस्तोत्रादिरूपेणस्मृत्वा ततोयथाविधिमत्रपुरीषोत्सर्गंकृत्वायथाविधिमृज्जलाभ्यांशौचंकृत्वा
विधिमनतिक्रम्यबाह्यादिनादंतान्धावयित्वा विध्यनुसारेणाचमनंकृत्वाविधानतः तत्रोपनि
मित्तंपंचम्यंतानतशिः विधानमनुसत्यथायोग्यगंगादिस्नानंकुर्यादित्येकान्वयः तदुक्तं
रात्रेःपश्चिमयामस्यमुहूर्तोयस्तृतीयकः सब्रह्मइतिविज्ञेयोविहितःसचबोधने ब्राह्ममुहूर्तइ
त्युषःकालस्यप्रसिद्धत्वैतिछांदोग्यभाष्याल्लेखहूत्रिंशतिमहूर्तोनोदिनमेवंविदुर्बुधाइतिव
तद्भाष्योक्तेः मुहूर्तमष्टभागेनघटिकाद्वयमिष्यते ब्राह्मेमुहूर्तेचोत्थायमुखंप्रक्षाल्यवाग्यतः
आचम्यप्रयतोमत्वाजपेद्गुरुपरंपरां तान्गुरून्मनसाध्यात्वाप्रणम्यचपुनःपुनः योगज्ञान
विधानेनध्यायेद्विष्णुमतंद्रितः मनसावचसाचैवसंपूज्यचप्रणम्यच॥ संकीर्त्यनामभिर्दिव्यैः
स्तुत्वास्तुत्वास्तुतिभिरेवच प्रातःकालादिकंकर्मनित्यनैमित्तिकंतथा केशवाराधनार्थाय
पवर्तिष्येहंतवाज्ञया नमोस्तुतेविबुधादेवाः विष्णुमत्कृतिपरायणाः धर्ममार्गेप्रेरयंतुमां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ वंतः सर्वदेवहि यस्मिदे विमला भागे विष्णुयात्राप्रवर्त्तते ॥ समुद्रवसने देवि पर्वतस्तनमं
डिते विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे श्रोत्रियं सुभगां गां च अग्निमग्निचितं तथा
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते पापिष्ठं दुर्भगां चांधं नग्नं निकृत्तनासिकं प्रातरुत्था
य यः पश्येत्तत्कलोपलक्षणं ॥ शौचयत्नं सदा कुर्याच्छौचमूलो द्विजः स्मृतः ॥ शौचाचार
विहीनस्य समस्ता निष्फलाः क्रियाः ॥ शौचं तु द्विविधं प्रोक्तं बाह्यमांतरमेव च ॥ मृज्जलाभ्यां
कृतं बाह्यं भावशुद्धिस्तथांतरं रागादिलोभः कामादिचितनं भागवतोक्तं बाह्यपविष्टः गच्छे
ग्रामाद्बहिः पश्चाद्वाग्यतो नियतेन्द्रियः ॥ नैरृत्याः पश्चिमे वायोः शुचिदेशे विवर्जिते कृत्वा
यज्ञोपवीतं तु पृष्ठतः कंठलंबितं ॥ अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा कुर्यान्मूत्रपु ण
रीषे च रात्रौ चेद्दक्षिणामुखः विदारयेत्तथा न तु क्रिम्यनुत्पन्नहेतवे दिवासंध्यासु कर्णस्थ
ण ब्रह्मसूत्र उदङ्मुखः ३ ३ सत्र दक्षिणकर्णस्य यज्ञोपवीतस्य मेकवस्त्रविषयं कंठलंबितं द्विव
स्त्रविषयं न च सोपानके मूत्रपुरीषे कुर्यान्न धृतजलपात्रश्चेति आपस्तंबः अथ प्रकृ
तं विण्मूत्रे लोष्ठतृणादिना उद्धृत्य वाससा उत्क्षिपेद्दुर्गंधितमेतनः आहारेन्मृत्तिकां कूला
द्विप्रः सशर्करां यथा यस्मिन्देशे च यत्तोयं या च यत्रैव मृत्तिका ॥ सैव तत्र प्रशस्ता स्या
त्तया शौचं विधीयते धर्मविद्भिर्णतस्तमधः शौचेन योजयेत् ॥ तथा च याम हसीन २
क्षि

नाभेरूर्ध्वंनशोधयेत् उध्दृत्योदकमादायमृत्तिकांचैववाग्यतः अर्धप्रसृतिमात्रंतु
विट्शौचेमदमाहरेत् इतरार्थेतदर्धंनशौचकर्मणियोजयेत् अर्द्रामलकमात्राचमूत्रशौ
चेचमृत्तिका ॥ मत्रेतुद्विगुणंकैमैमैथुनेत्रिगुणंस्मृतं अर्धप्रसृतिमात्रातुप्रथमामृत्तिका
स्मृता द्वितीयाचतृतीयाचतदर्धंवैप्रकीर्तिता एकालिंगेकरेतिस्रउभयोर्मृद्द्वयंचतु पंचापा
नेदशैकस्मिन्तुभयोःसप्तमृत्तिका लिंगशौचंपुराकार्यंगुदशौचंततःस्मृतं एतच्छौचंगृहस्थस्यद्वि
गुणंब्रह्मचारिणः वानप्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणं यद्दिवाविहितंशौचंतदर्धंनिशिकी
र्तितं तदर्धमातुरेप्रोक्तं आतुरस्यार्धमध्वनि स्त्रीशूद्राणामशक्तानांबालानांनोपनीतिनां
गंधलेपक्षयकरंशौचंकुर्यान्नसंख्यया एकैकयामृदापादौहस्तौप्रक्षालयेत्ततः प्रथमंप्रा
ङ्मुखोवामंदक्षंप्रक्षालयेत्क्रमात् नउसन्नेवजलेनाचामान्यमथवल्लोकयत् इत्येवंमद्विराजा
तुप्रक्षाल्यचरणौपृथक् हस्तौवामणिबंधाच्चकुर्यादाचमनंतथा षड्वारंकुरुतेमंत्रेत्रिवारं
चपुरीषकं एतच्छौचविधिःपूर्वंमलतउर्ध्वंनदोषभाक् यावन्नापैत्यमेध्याक्तोगंधलेपश्चतत्कृ
तः तावन्मृद्वारिदेयंस्यात्सर्वासुद्रव्यशुद्धिषुशौचशेषांमृदंतोयैःसम्यक्प्रक्षालयेत्ततः दंतानांशो
धनंकुर्यात्काष्ठेनस्नेययाविधि कार्पासंतुवरीवेणुंतिंत्रिणींचविवर्जयेत् कषायकटुतिक्ते
नविनादंतांश्चतुदन्ती उपोषणाहंश्राद्धाहंअमावास्याचसंक्रमं निषिद्धदिवसेकुर्या
द्दूषाद्वादशैवतु तपर्णैःसः निषिद्धोदंतकाष्ठस्यभोज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांतेन कस्यचित् पत्रैर्वा द्वादशैर्दंतान् गंडूषैः शोधयेदपि १ गंडूषविधिः चतुरष्टद्विषट् अष्टगंडूषाः
शुद्धकारणाः मूत्रे पुरीषे भुक्तेंऽते तथैव मुखे निःसृते १ पुरतो देवता तिष्ठेद् दक्षिणे पितृदेवताः गंडूषदे
३ पणं तस्माद्वामभागे विधीयते २ अथाचमनं सपवित्रेण हस्तेन कुर्यादाचमनं क्रियां नोच्छिष्टं तत्
स्पवित्रं स्याद्भुक्तोच्छिष्टं च वर्जयेत् १ समौ द्वौ स्थौलदीर्घांगुलांसमौ प्रादेशसंमितौ पवित्रे ग्रंथि
तेज्ञेयो दैवे कर्मणि चोदिते २ साग्राणि त्रीणि प्रादेशसंमितानि समानि च नैकमूलान्यबध्वा
नि पवित्राणि हपेत्वकेऽ हेम्ना रौप्येण ताम्रेण मिश्रेणैवाथवा सदा पवित्रं धारयेद्धीमान् तत्कर्मपू
र्णत्वये ४ प्रक्षाल्य पाणिपादौ च शिखां बध्वा सुखासने हृदये संस्मरेद्विष्णुं ततआचमनं
चरेत् मुक्ताकनिष्ठिकांगुष्ठं माषमात्रं जलं पिबेत् अंतर्जानुः शुचौ देशे उपविष्ट उदङ्मु
खः ६ प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् कनिष्ठादेशिन्यंगुष्ठमूलमग्रं करस्य च
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ७ करमध्ये सौम्यमग्नितीर्थं च तत्र सौम्येनान्नप्राशना
दि अग्नितीर्थेन येन प्रतिग्रहं कुर्यात् अंगुष्ठाग्रसमाकुंच्य मध्यपर्वस्यूयोऽजपितां च मेत्त्र सच गो
कर्णा उच्यते केशवादित्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ द्वाभ्यां प्रोष्ठौ च संमृज्य द्वाभ्यामुन्मा
र्जनं तथा १ येकेन वामं संप्रोक्ष्य पुनश्चैकेन पादयोः एकेन मूर्ध्नि संप्रोक्ष्य मुखं संकर्षणादिभिः २
नेत्रे नासिके च तथा श्रोत्रे नाभिं च बाहू हृदि शिरो बाहू च क्रमशः स्पृशेद् द्वादशनामभिः ३ अशक्त
स्तु त्रिभिः पीत्वा हस्तौ प्रक्षाल्य श्रोत्रं स्पृशेत् अग्निस्तीर्थानि वेदाश्च वरुणार्केंदुवायवः ॥ ३
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति देवताः तस्मात्कर्णस्पर्शमात्रेण शुद्धिर्भवति नान्यथा २॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथस्नानं बहुधा तदुक्तं वाराहे मंत्रस्नानं मलस्नानं ध्यानस्नानं च वारुणं पंचमं च जलज
स्नानमिति पंचविधं स्मृतं नवह्याम्यिदं देहं स्रवस्यहरहर्मलं तच्छुध्यर्थं प्रकर्तव्यं मलस्नानं दिने
दिने अथ मत्रिर्निमज्याप्सु करान्यां शोधयेत्ततः मलस्नानमिदं प्रोक्तमावश्यकमिदं नृणां अ
थ शीतजलाशक्तो कुर्यादि वोष्णवारिणा प्रक्षिप्य शीस्वपूष्णं वारिपश्चाच्छीतलं तुलसीम
त्रिका युक्तं गायत्र्या चाभिमंत्रितं जलं विधाय कुर्वीत योह्यशक्तो भवेद्विजः नाशुद्धतजलस्नाने
देवर्षि पितृतर्पणं अघमर्षमंत्रं तु पठन्नं बुधि निक्षिपेत् स्नानं मूर्ध्नि तथा कुर्यान्नित्यकर्मवि
धानतः अस्याप्यशक्तो कर्तव्यं मंत्रस्नानं दिने दिने संध्योपासनकर्मादावधिकारस्य सिध्ध
ये आर्द्रवस्त्रेण संमज्य हस्त्यन्यध्धौतं विधारयन् अचम्यजलमादाय पात्रे वामकरेथवा गा
यत्र्या वाथ मलेन त्रिवारमभिमंत्रयेत् तज्जलं प्रोक्षयेद्गात्रे दर्भैर्वा तुलसीदलैः तर्जनीम
ध्यमाभ्यां वान्यैश्चैवाद्रैवलेन चैभ्रमो शिरश्चाकाशे आकाशे भुवि मस्तके मस्तके च तथाका
शे भूमौ चनवधा क्षिपेत् अन्येवनः स्मृतो मंत्र आपोहिष्ठेति वै ऋचा त्रिरावृत्त्या क्षिपेत्तो
यं प्रत्यचं नवधा द्विजः ओंकारांतदयं प्रोक्तं भूमिः पादाविति स्मृता ततआचम्य विधिवत्कु
र्यात्संध्यादिकर्म च अयदात्तत्राप्यशक्तोपि वृद्धेवाप्यथवातुरः शयानोपि प्रकुर्वीत ध्यानस्ना
नमतंद्रितः उद्यदादित्यसंकाशं पीतनिर्मलवाससं सर्वावयवसंयुक्तं सर्वाभरणभूषि
तं ॥ सर्वलक्षणसंयुक्तमनंतं लिंस्वष्टदेवतां मस्तकोपरितां ध्यायेत्तत्पादाभ्यां विनिःसृतां
ब्रह्मणा क्षाल्यमानाभ्यां गंगां त्रिपथगामिनीं धवलां शिवनिर्मलां वै निःस्तलावहिः पै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निपतंतीस्वकैमे मूर्ध्नि प्लावयंती मुहुर्मुहुः सर्वांगानि ततः सम्यगाचम्य सुचितां व्रजेत् स्नानापि
६ विधिवच्छक्तो वारुणेन जलेन वा मंत्रस्नानं तथा ध्यानस्नानं कुर्याच्च नित्यदा अधिकारभेदे सिद्धिः
स्नानद्वयसमुद्भवा जलस्नानमथो वक्ष्ये सिद्ध्यर्थे सर्वकर्मणां गंगादिषु यथालाभं कूपादौ स्नान
माचरेत् शुचिः क्षालितपादः सन् धौतहस्तो द्विराचमेत् ततो बद्धशिखो भक्त्या देशकालं च संस्मरेत्
त्रिर्निमज्ज्य मलस्नानं विधायाथाभिमंत्रयेत् गायत्र्या वाथ मूलेन यथाः प्रवत इतीरयन् प्रार्थयित्वा
नदीः सर्वा इमं मे इति वै ऋचा मंत्रयित्वा नवर्चेन मंत्रेणापः स्वैवतेन तु पादशोर्धर्चशश्चैव ऋक्श
श्चापि जलं क्षिपेत् हस्ताभ्यामूर्ध्वतः कुर्यादघमर्षणमार्जनं ऋतं चेति त्र्यृचेनाप्स्फुलपयेन्मूर्तिम
र्चयेत् ध्यात्वा जलस्थां मन्मूर्तिं मूलमंत्रेण मन्त्रितः जलेनैव तु कुर्वीत षोडशानुपचारकान्
तस्मादसलिलं मूर्ध्नि धृत्वा वै त्रिःपिबेदपः ततआचम्य कुर्वीत तर्पणं जलसंस्थितः ब्रह्मादि
देवान्मद्देवान् सुवस्वर्गभुवस्थितान् ऋषीन्द्वैपायनादींश्च मर्त्यभुवस्वस्थितांस्तथा तर्पयेच्चाग्निं
कव्यवाहनादींश्च पितॄंस्तथा ये के चास्मत्कुले जाता० इति मंत्रेण वस्त्रांभो दत्वाभिष्पीड्य चांबु
नि ततस्तीर्थं समासाद्य यक्ष्माणं तर्पयेद्द्विजः यन्मया दूषितं० इति मंत्रेण संगृह्य तीरे जलांजलिं
क्षिपेत् सालिग्रामशिलातोयं ततो वै मूर्ध्नि धारयेत् त्रिःपिबेत्तीर्थमाहात्म्यं मंत्रान्वै समुदीरयन् ॥
स्वस्वाशाखोक्तरीत्या स्नानकाले कुटिं बध्वा वामप्रकोष्ठे निक्षिप्य द्वितीयवस्त्रं वा निष्पीड्येत्सर्थः ६
ततीयाध्याये वासिष्ठे उद्धृत्य पंच पिंडान्दत्वा निष्पीड्य चांबुनीत्यस्यायमर्थः स्नायादपर
वारिषु अनुद्धृत्यैव नद्यां तु दूरप्रस्रवणादिषु स्नानमप्स्वैवतैर्मंत्रैर्मार्जनं चाघमर्षणं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रद्वयेनाभिमंत्र्य तस्मिन्ध्यासनातनं अनंतभोगपर्यंके शयानं रमया सह ध्यात्वा निमज्ज्य वेदे
वेदैस्त्रिः पठेदघमर्षणं तथैव मंत्ररत्नं च जपेदप्सु निमज्ज्य वै उत्थायाचम्य विधिवद्देवर्षिपि
तृतर्पणं उत्तीर्य वस्त्रं निष्पीड्य पुनराचमनं चरेत् तत्र वाप्यां वा ध्याये नदीतटाके वाप्यादौ पश्चा
त्स्नानं समाचरेत् कृत्वाघमर्षणं स्नानं पूर्वमप्सु समाहितः आचम्य मंत्ररत्नेन प्राणायामं समाचरे
त् ॥ अभिमंत्र्य जलं पश्चान्मंत्ररत्नेन वैष्णवः विरजां संस्मरेदप्सु दिव्यां देवमयीं शुभां निमज्ज्या
प्सु जपेत्पश्चान्मंत्ररत्नं समाहितः उत्थाय जलमादाय मंत्रेणैवाभिमंत्र्य च प्राशयित्वा द्विराचामे
दैवादींस्तर्पयेद्द्विजः उत्तीर्य पीड्य वस्त्रं पुनराचमनं चरेत् इति अत्र जलस्नाने विशेषमाचार्यः
उद्धृतेति मृदा लिप्य द्विषडष्टषडक्षरैः त्रिर्निमज्ज्याप्सु सूक्तेन प्रोक्षयित्वापु
नस्तथा मृदा लिप्य निष्प्य त्रिस्त्रिर्जपेदघमर्षणं ऋ स्रष्टारं सर्वलोकानां स्मृ
त्वा नारायणं परं ध्यायतः श्वासो निमज्ज्याप्सु प्रवेनोत्थितस्ततः ईशानेन सिंह
सिंचयेत्पुरुषसूक्तेन स्वदेहस्थं हरिं स्मरन् ५ ॥ उद्धृतासि वराहेणेति)
ऋचेन तुलसीमूलस्थादिमृत्तिकया शरीरं लेपयित्वा त्रिवारं स्नात्वा अष्टवा षड्वा अस्त
रापितेषु तत्र योक्ताः वासुदेवद्वादशाक्षरमंत्रेण नारायणाष्टाक्षरमंत्रेण विष्णुषडक्षरमंत्रे
णययाधिकारं त्रिवारं स्नात्वा चम्यापोहिष्ठेति तत्र्चेन शरीरं प्रोक्षयित्वा पुनःस्तथा उद्धृ
तेति मृदा शरीरमालिप्य पुनरपि त्रिवारं स्नात्वाप्सु निमज्ज्य यत्किं तं चेति त्रिरघमर्षणसूक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिवारं जपेदित्यन्वयः जपकाले पीठं भावयेत् ~~आत्मानं सर्वलोकानां~~ न्यासनिबंधनरूपप्राणायामे कृत्वा
१ ऋतं मध्ये वक्ष्यते चैत्य अघमर्षणमंत्रं सर्वलोकानां सप्त लोकसमुद्राहोरात्र्यादि कालसूर्यचं
द्रादीनां सर्जकं परं सर्वात्मं नारायणं उदधौ तस्य शेषपर्यंके स्मरन् जलेन वामनासाया प्रणव
मंत्रैः स्वषोडशोपचार पूजां च कुर्वन् जलान्तु प्रभावेन ओंकारोच्चारणपूर्वकमुत्थितः सन् पुरुष
सूक्तेन स्वदेहस्थं तं स्मरन् स्वशरीरस्थित पुरुषसूक्तं पठित्वा तदर्थभूतं सर्वचेतनाचेतनलोकस
र्जकं स्वदेहस्थितनारायणं पंचकोशांतर्गतशरीरस्थितं तुर्यं च शंखमुद्रया प्रोक्षयेदित्यर्थः यत्तत्
तिरिक्तं सर्व वा तानी स्याद्वा सिद्धीस्याद्वा कुर्यात् जलमध्ये पितृस्नानं गुरुस्नानं केशवाद्यभीष्टदेव
तामंत्रादिस्नानं यथाप्रमाणमघमर्षणं पूर्वं वा पश्चाद्वा कृत्वा जलतर्पणादिकं कृत्वा तीरे शि
रोदकं दत्वा किंचित्कालं स्थित्वा शुष्कवस्त्रेण सप्त वा ताडितार्द्रवस्त्रेण देहं मार्जयेत् नार्द्रेण
न पाणिना २ तत्र ग्रंथे यथाविधीत्याद्युक्तेतदं ते कृत्वा संक्षेपतः शुन्युभेति वक्ष्यमाणत्वाच्च
तंत्रसारे यावतानुष्ठानं कर्मपूर्तिर्न जायते तावत्समस्तं कथितमिति अस्य संक्षेपशास्त्र
त्वात् न विस्तरः विरोधितां श्रद्धेये तेषां सुगमो मार्गः सफलस्यानुष्ठितमिति चोक्तत्वात् सकलम
आवश्यकमेवाचारो त्रोक्तेन तु शौचादेर्विस्तारः बाह्यस्नानमृत्तिकास्नान तंडुलतिलामल
कं गोमय दूर्वा पंचगव्यभस्मादेराचारातुक्तः किंच उपक्रमे सन्न्यस्य आत्मचेतसा निराशीर्निर्ममत्वा
मरतिमध्ये निस्यं तदर्पणं परस्मै संनिवेदयेत् समर्पयेत् दिशि उपसंहारव्यासवाक्यस
मुद्धृतिः सदाचारस्य विषय इति वक्ष्यमाणत्वात् कर्मणां तन्निष्ठा की य स्मृत्युक्तानी तदुक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मवतां सुलभानाम विरुद्धानांलक्षणादिभिरपिकरणीयत्वं श्री विष्णुप्रेर्पणाय विष्णुप्रीत्यर्थं कुरि
ष्य इति संकल्प्य मध्ये पिपतिर स्मरणा प्रतिकर्म च हरिं स्मृत्वांते कृष्णार्पणं कुर्यादिति कर्मणि
करणे इति कर्तव्यतां च वक्ष्याचार्य इति तेष्वपि कर्मस्वनानुवक्ष्यादि शंकाव्याप्तैति ज्ञेयं तदुक्तं
यंनाम्नातस्य शाखायां परोक्तमविरोधितु॥ विद्वद्भिः तदनुष्ठेयं अग्निहोत्रादि कर्मवदिति
चोदनाद्य विशेषात्तु वेदः कृत्स्नोधिगंतव्यः सर्व वेदोक्त मार्गेण कर्म कुर्वीत नित्यशः ध्यानं
दोहि फलं यस्माच्छास्त्रोदोह्यशक्तितः सर्वकर्म फलतो यस्मादशक्ताः सर्वजंतवः शाखाभेदा
त्कर्मभेद व्यासंतस्मादचीकृपदित्यादि भाष्योक्तेः ध्यानार्चं गुरुशुश्रूषा नित्यनैमित्तिकाः
क्रियाः तीर्थदानजपादास्य स्वाध्यायो हरिकीर्तनं द्वादश्यादिव्रतं चैव तुलस्यादेर्यथा
र्चनं सर्वमक्षयर्थमुद्दिष्टं निष्फलं तुलया विनेति हरिवंशे तीर्थस्नानजपाहोमपर्वा सर्वे
पि सर्वदा अंगानि हरिशोवायां भक्तिस्त्वेका विमुक्तये इति तात्पर्यनिर्णये मंत्रतस्तंत्रत
छिद्रं देशकालार्थवस्तुतः सर्वं करोति निश्छिद्रं अनुसंकीर्तनं तव मंत्रमध्ये क्रियामध्ये विष्णोस्मरणपूर्वकं यत्किं
चित्क्रियते कर्म तत्कर्म सफलं कुरु मंत्रतंत्रोपकरणकर्तृवन्हिषु केशवं देशे कालेच मत्वाना स्वक्रुस्ते कर्मनिर्म
लं यस्य स्मरणमात्रेण जन्मसंसारबंधनात् विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे मातृतापितृतागाद्धो
गुरुराचार्यतातथा श्वादपुष्कसकः शुद्धोजायते यत्प्रसादतः पुरुषस्तमजं नित्यं व्रजामि शरणं हरिं॥
भक्त्येव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं विधानं कर्म।
६ णोज्ञात्वा ततः सम्यक् समाचरेत् कुर्वन् कर्मफलत्यागी कुर्वन्विष्ण्वर्पणं तथा ततोंतःकरणशुद्धिः
स्यात्तद्द्वाराज्ञानमाप्नुयात् अनुष्ठाता तपस्वी च सर्वधर्मपरोपि वा विना तदर्पणं सम्यक्फलं नाप्नोत्यसंशयः
दृष्टिहीनो यथा प्रवर्तंते प्रातरारभ्य तत्क्रियाः ता विष्ण्वर्पणं कुर्वन् कर्मपाशाद्विमुच्यते अध्याजनित्री धर्माणाम
त्यामाता परागतिः अश्रद्धाहीनाः क्रियाः सर्वा न फलंति कदाचनेति वायुपुराणे तपस्विनो इत्यादि भा
गवतोक्तेश्च सर्वाणि स्वस्ववर्णाश्रमोचितानि प्रत्यंगं प्रतिक्षणं विष्णुभक्त्यादिपूर्वकाणि तत्प्रीतिसाध
नत्वेन निष्कामत्वेन निरहंकारतया तच्चरणाय संकल्पकृतानि हरावेव समर्प्याणीति तात्पर्यार्थे
-द्ग्विमाविस्यादिवाक्यान्युदाहृत्य सदाचारस्य विषये व्यासवाक्योद्धृतिः कृतेति ज्ञेयं सर्वसमंज
समिति प्रकृतमनुसरामि अनुनुतात्पर्यस्य वस्त्रमराकत्वात् स्नानानंतरं कर्तव्यमाह वासो वसित्वा
वसित्वा वास आचम्य प्रोक्ष्याचम्य च मंत्रतः गायत्र्या चांजलिं दत्वा ध्यात्वा सूर्यगतं हरिं ६
मंत्रतः परिवस्त्राय समाचम्य स्मरादिकान् तर्पयित्वा निपीड्याथ वासो विसृज्य चांजसा ७
अर्कमंडलगं विष्णुं ध्यात्वैव त्रिपदीं जपेत् सहस्रपरमां देवीं शतमध्यां दशावरां ८ श्री॥
वाससा पंचकच्छयुक्तेन तत्स्तेन गुदादिकमाच्छाद्येत्यर्थः ततः आचम्य पूर्वपरिहितं वस्त्रं स्वस ६
मीपं संस्थाप्य मंत्रः शुची वो हव्या इति प्रोक्ष्य पुनराचम्य धौतोर्ध्वपुंड्रकादि राचम्य प्राणानाय

म्यपुनर्मंत्रतः प्रोक्ष्य स्वनासाखोत्कारीत्या पुनर्मार्जनं कृत्वा पुनर्मंत्रतः पापपुरुषविसर्जनमंत्रे
ण पापपुरुषं बहिः प्रोक्ष्य विसृज्य पुनर्मंत्रतः आचम्य गायत्र्यापोहिष्ठा ॐ मृरि स्वादि हृदर
त्राभिर्मंत्राचमनं कृत्वा सूर्यगतं हरिं ध्यात्वा तमुद्दिश्य गायत्र्या मंत्रेण स्फुरत्प्रकारेणोदकांजलित्र
र्घ्यरूपं दत्वा चसमुत्थाय पुनः स्मृत्युक्तरीत्या द्विवारं चरित्वा मंत्रतः गायत्रीमंत्रेण तदर्थभूतसूर्यगतं पा
हरिं ध्यात्वा मंत्रतः उद्यंतमस्तं यंतमिति मंत्रेण परिवृत्य आत्मानं प्रदक्षिणीकृत्य समाचम्य वृक्षावादि
मंत्रे सूर्यर्पणं कृत्वाथाक्षरादिमंत्रैस्तर्पणं कृत्वा सम्यगाचमनद्वयं कृत्वाथ ब्रह्मयज्ञादिकं कुर्य्ये
इति संक्षेपाथ मंत्रतः विद्युदसीति मंत्रेणापउपस्पृश्याचम्य हस्ताववनिज्य त्रिराचामेद्विः प
रिमृज्य सकृदुपस्पृश्य • शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्येति मंत्रेणामंत्रोक्तरीत्या त
त्रस्थानेषु दर्भं प्रोक्ष्य स्वशाखोक्तरीत्या व्याहृतिपूर्वं पच्छोर्धर्चशः ऋक्कशश्च गायत्रीं जप्त्वा यथा
चतुर्वेदाद्यनुवाकान् षडंगकल्पसूत्रादिविशिष्टमंत्रांश्च जप्त्वा ऋचो अक्षरे नमो ब्रह्मणे इति
परिधानीया ऋचं त्रिवारं जप्त्वा देवऋषिपितृन् तूपाय नाम्ना मनुष्यपितृश्च तर्पयित्वा एके चास्म
दिति मंत्र पूर्वपरिहृतं स्वसमीपे निहितं वाससः स्थले निष्पीड्याथ वासः विसृज्य जलमध्ये धृतांज
लिः विस्तृत्वा तपे प्रस्थाप्य पर्वान्तयाध्येयः सदेति वक्ष्यमाणरीत्या गायत्र्यर्थभूतं सूर्यमंडल
स्थं विष्णुं ध्यात्वैव त्रिपदी गायत्री सहस्रमावृत्तिः परमा मुख्या पक्ष्याः शतथा शतमावृत्ती
मध्यापक्ष्याः शतथा दशावृत्तयो अवरापक्ष्याः शतथोक्तं नोक्तं च जपेत् उपांशु पठेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रोत्तरकर्तव्यमाह सूर्यदर्शनपर्यंतंतिष्ठन यथायोग्यंदशकादिगायत्रीजपंकुर्वन्निति
शेषः ततः सूर्यदर्शनानंतरंउपविशेत वा तिष्ठेद्वा पूर्वां प्रातःकालीनां सनक्षत्रां नक्षत्रद
र्शनसहितां संध्यां सध्यात्राशब्दवाच्यां गायत्रीं वाग्यतोजपेत् उत्तरां सायंतनीं संध्यां उप
विश्यैव सूर्याभिमुखतः उपविश्यैव न स्थित्वा सदिवाकरां सूर्यसहितां संध्यां सदाजपकालेस
दैव वाङ्नियमेनजपेदित्यन्वयः प्रोक्षाचम्य चमंत्रेण इत्यादिनी सायंतनी संध्या मध्याह्नि
कीचोपविष्टइतिवेदितव्यं तदुक्तंवाराहे दो आच्छाद्य वाससी धौते पुनराचमनंचरेत् ॥
आसूर्यदर्शनात्तिष्ठेत्ततः स्यादुपविश्य तवा पूर्वांसंध्यां सनक्षत्रामुत्तरां
सदिवाकरां १ उत्तरामुपविश्यैव वाग्यतः सर्वदाजपेत् १ ध्येयः सदा
सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः केयूर
वान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः १० ॥
प्राणायामत्रयं कृत्वा तिलकायुधधारणं करिष्ये इति संकल्प्य वामहस्ते जलं क्षिपेत् स्योना
पृथिवीतिमंत्रेण गायत्र्याच समाहितः अथ मूलेन मंत्रेण मर्दितां तां मर्दं पुनः गायत्रीमूलमं
त्राभ्यां दशकृत्वस्त्रिरेवच ललाटमध्योदरहृत्कंठेषु सपार्श्वयोर्भुजमूले च दक्षे तद्वामे पृष्ठ
मूले च मूर्ध्नि सुकेन्यसेत् केशवादीनि नामानि संकर्षणादीन्यथ हस्त्वापक्षे नामानिविद्वान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ अणो द्वादशौ वं नारायणायुधादि मुद्रां संप्रार्थयेद्बुधः सुदर्शन महाज्वालकोटिसूर्यसम
प्रभः आज्ञानांधस्य मे नित्यं विष्णो मार्गं प्रदर्शय १ पांचजन्य निजध्वानध्वस्तपातकसंचय
पाहि मां पापिनं घोरं संसारार्णवपातितं २ संसारभयभीतानां योगीनामभयप्रद पद्महस्तस्थितं वि
ष्णोः पाहि मां सर्वतो भयात् ३ दैत्यशोणितदिग्धांगे कौमोदकि गदे हरेः भिंधि भिंधि तमोंतस्थं तान
मामि पुनः पुनः ४ नाममुद्रेन मस्कन्धंतरं कितलनुतरेः प्रसादाद्धुलोके च चिरं स्थास्यामि
निर्मलः ५ इत्यायुधानि संप्रार्थ्य गहीत्वा मुद्रिकास्ततः एवं कपोले हृदये त्रीणि मध्योदरे तथा
६ पंच पार्श्वद्वयं त्रीणि दक्षिणस्तनमंडले चक्रद्वयं दक्षिणे तु बाहो क्षितिलकमूर्धनि ७ बाहौ तु
तिलकाधस्ताद्दक्षिणो शंखमेककं कर्णमूले तथा वामे शंखमेकं तु विन्यसेत् ८ ललाटे तु ग
दा धार्या वामपार्श्वे तथा स्तने एकैकं धारयेत् सद्यः मध्ये पार्श्वे तथा स्तने ९ एवं कंठे दक्षिणे
बाहौ च कूपर्द्वयं न्यसेत् नमः सर्वेषु सर्वास्कुस्तनयोश्च कपोलयोः १० प्रक्षाल्यायुधतोये
न शिरोमलेन मार्जयेत् नमो रुद्रेभ्य इत्युक्त्वा स्थापयेन्मानिलासदेति उपासीत ततः संध्यां प्राङ्मुखो
दङ्मुखोपि वा अंतर्जानु करौ कृत्वा प्रायोणामान्सदाचरेत् १२ सोपवीतो बद्धशिखः हरौन्यस्तम
नाप्रठेत् सव्याहृतीसप्रणवां गायित्रीं सिरसा सह संपीड्य नासाम गुष्ठनामिकान्यां न वेतरैः
१५ प्राणायमत्रयं कार्यं संध्याहोपजपादिषु व्याहृतीनां च सर्वासां ऋषिश्चैव प्रजापतिः छंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कंदेवी गायत्री परमात्मा च देवता एवं ज्ञात्वा विधानेन देश कालानुदीर्यंच आपो हि ष्ठेति
६ मंत्रेण मार्जयेच्च समाहितः॥ सूर्यश्चेति मंत्रेण मंत्रयित्वापि वेदपः मंत्ररत्ने प्राङ्यायः पश्चा
दाचमनं चरेत् आपो हि ष्ठेति मंत्रेण पुनः संमार्जनं चरेत् उत्थायार्कं प्रतिप्रेक्ष्य गायत्र्यान्यांज
लिं द्विजः आदित्यमं उ ठों नस्थं ध्यात्वा देवसनातनं सावित्री मंत्ररत्नं च जपो दष्टोत्तरं श
तं उदुत्यमिति मंत्रेण उपस्थानं समाचरेत् तर्पयन्मंत्ररत्नेन शक्त्या देवं जनार्दनं तदी
यांतर्पयेत्सम्यान्नित्यमुक्तांस्तथेतरान् अनन्यांशस्येन भावेन देवादीनपि तर्पयेत्॥ निष्पीड्य स्ना
नवस्त्रं तु पुनराचमनं चरेत् उदितवाशिष्टे वाराहे तु कालातिक्रमणे स्वल्पे त्रिसंध्या
स्वपि कुर्वीत चेत् चतुर्थार्घ्यं प्रकुर्वीत शिरोव्याहृतिसंयुतं प्राणायामत्रयं प्रातर्द्वि
गुणं संगमे स्मृतं मध्याह्ने त्रिगुणं प्रोक्तमपराह्णे तु षड्गुणं सायाह्ने द्वादशगुणं स
र्वत्र्यौं ततो व्रजेत् ब्रह्मयज्ञं प्रकुर्वीत प्रत्यहं तिलतर्पणं पितृणुद्दिश्य पित्रादीन्
निषिद्धदिवसं विना भानुवारे भौमवारे नंदाभृगुमघासु च त्रयोदश्यां च सप्तम्यां भरणी
कृत्तिकासु च अयने द्वितये चैव चत्वष्वपि युगादिषु गते मृताहे जन्मर्क्षे संध्ययोश्च तथा
निशि पिंडदानं मृदा स्नानं न कुर्यात्तिल तर्पणं निषिद्धदिवसे वारे नक्षत्रे च तथा तिथौ ६
यस्तिलैस्तर्पणं कुर्यात्स ज्जलं रुधिरं भवेत् तीर्थे तिथिविशेषे च प्रेतकार्ये तथैव च॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रेतपक्षे व्यतीपाते संक्रांतौ वैधृतावपि निषिधेपि दिने कुर्यात्तिलयुक्तं तु तर्पणं अमतं
तु भवेत्प्रातर्मध्याह्ने क्षीरवद्भवेत् अपराह्णे भवेत्तोयं सायाह्ने रुधिरं भवेत् श्राधांगतर्पणे
ह्येतन्मध्याह्ने नित्यतर्पणं सं।क्रोचे तीर्थलाभे वा प्रातरप्याचरेच्च तत् दिवोदितानि कर्माणि प्रमा
दादकृतानि चेत् शर्वर्याः प्रथमे यामे दिवावत्कर्म कारयेत्॥ ब्रह्मयज्ञं च सौरं च न कुर्यात्ति
लतर्पणं तिष्ठन्नपि शयानो वा ब्रह्मयज्ञं समाचरेत् तस्य तु द्रुवनध्यायौ देशौ वान्याय दा
सुचि अशक्तोपि प्रकुर्वीत ब्रह्मयज्ञं च नित्यशः इमं तु वैश्वदेवात्प्राक् ऊर्ध्वं वापि समा
चरेत् निष्पीडयति यो मूढः स्नानवस्त्रमतर्पितं निराशाः पितरस्तस्य शा[illegible]। ष्वागच्छ
न्ति नान्यथेति वाराहे तृतीयाध्याये कर्मक्रमः उषःकाले समुत्तिष्ठेत्सर्वदा वैष्णवो नरः॥
प्रक्षाल्य पाणिपादौ च तत आचम्य भक्तितः सुखासीनः स्मरेन्मूर्तिं मदीयामिष्टदेवतां
घटिमात्रं ततो ध्यात्वा कुर्यान्नीराजनं मम नमस्कृत्वा ततो गच्छेन्मलोत्सर्गभवेन्न
रः सृजेन्मूत्रपुरीषे च दंतधावनमाचरेत् आचम्य च ततो गच्छेत्तीर्थं स्नानाय तत्र
च स्वशाखोक्तविधानेन स्नानं संध्यां च तर्पणं विधायागत्य जुहुयाद ग्निलौ वा तु लिंद्वि
जः जपस्वाध्यायहोमार्चामहायज्ञांश्च पंच च विधाय विधिवत्प्राज्ञो भुंजीत विधिना
ततः सायं संध्यामुपास्याथ पूजयित्वा पुनर्हरिं यामादूर्ध्वं शायी यौ तो पुनरुत्थाय चोपविश्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंदिने दिने कुर्याद्द्विजुत्तो वेमतीयते सत्यमेव संध्याकालेतु गायत्र्याश्चिगुणामलमंत्रक
इति यावद्देवान्नृषींश्चैव पितृंश्चापिन तर्पयेत् तावन्नपीडयेद्वस्त्रं येन स्नातो भवेन्नरः इ
योगेश्वरः यस्तु स्तुतिर्जपः प्रोक्तो ब्रह्मयज्ञः सउच्यते सचार्वाक् तर्पणात्कार्यः पश्चाद्वा
प्रातराहुतेः वैश्वदेवावसाने च नान्यत्रत्स्य निमित्तत इति छंदोगपरिशिष्टे उत्तमातारकोपे
तामध्यमालुप्ततारका अधमासूर्यसहिता प्रातःसंध्यात्रिधामता महूर्त्तादुदयाद
र्वाक्तुर्द्विमुहूर्त्तमतः परां संध्याकालः स्मृतः पूर्वं विपरीतंतु पश्चिमे नित्यंतु तर्पणाद्ध
त्वा यो गायत्रीजपेद्द्विजः वृथा तस्य भवेज्जाप्यं पितृहासोपिजायते पंचपंचउषःकालः सप्तपंचारु
णोदयः अष्टपंच भवेत्प्रातः शेषः सूर्योदयस्मृतः इत्येतत्साधनद्वादशीविषयइति वाराहेउक्तं
अरुणोदयतः पूर्वंघटिकायावत्रिशिष्यते सैव सूर्योदयोनाममुनिभिःपरिकीर्तितः १ तत्पूर्वंघटिका
यातु प्रातःकाल इतीरितः माध्यान्हिकंतदा कुर्याद्धोमं सूर्योदयेतथा वैश्वदेवंततः कृत्वा ब्रह्म
यज्ञं च तर्पणं आपोशानं विधायैव प्रदोषेद्वि दर्शने अरुणोदयतः पूर्वं कृतस्नानं तथाभवेत्
ततः पर्युषितं तत्स्यात्साधनद्वादशीदिने ति देवादितर्पणात्पूर्वं संध्यांगत्वेन यो जपेत् ॥ गाय
त्र्या जंन्यमंत्रांश्च तत्सर्वं निष्फलं भवेत् इति विष्णुतीर्थीये शुचिः संध्यामुपासीत कुर्याद्देवा
दितर्पणं तिष्ठंस्तुदयपर्यंतं गायत्र्याश्च जपंचरेत् नस्तुरांपिबेत्तत्पलांडुं भक्षयेत्त्वष्टांवदेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विस्मरेदात्मनो सोमं पिबेत् इतरशेषेणावर्तयेदित्यादिवाक्यबाहुल्यादन्यथानुपपत्त्यापक्षद्वयं प्र
तीयते अर्घ्यप्रदानमुख्यं संध्यावंदनं जपप्रधानमुख्यं चेति तत्राद्यपक्षे अर्घ्यांतं संध्यावंदनं कृत्वा ती
र्थेन ब्रह्मयज्ञतर्पणं कृत्वा जपसूर्योपस्थानादि कृत्वा गृहमागत्योपासनं कृत्वा प्रातर्देवपूजां कृत्वा
विहितवृत्त्या धनाद्युपार्जनं कुर्यात् जपप्राधान्यपक्षे अर्घ्यजपसूर्योपस्थानं कृत्वा तेन तीर्थेन ब्रह्मय
ज्ञदेवऋषिपितृतर्पणं कृत्वा गृहमागत्योपासनादि कुर्यात् अर्घ्यपक्षो ग्राचार्यैः कंठत उक्तः
द्वितीयस्तु पक्षो मंत्रतः पठितव्य इति अथ शब्देनोक्तः अन्यथा परिवृत्त्येति अत्रैव कर्मक्रमस्या
न्त्या तत्र व्यर्थः स्यात् प्रातःस्नानाशक्तस्तु मंत्रस्नानेन संध्यां कृत्वा माध्याह्ने बहिः स्नानं चेत्तत्रा
पि पक्षद्वयेन अर्घ्यांतं वा जपांतं वा संध्यावंदनं कृत्वा तीर्थेन ब्रह्मयज्ञतर्पणं कृत्वा वासो निष्पी
ड्य गृहमागत्य देवतार्चनं कुर्यात् अशक्तः प्रातर्वा माध्याह्ने वा गृहे एव कोष्णोदकेन स्नात्वा यथा
रुचि संध्यावंदनांते सालग्रामनिर्माल्यविसर्जनतीर्थेन ब्रह्मयज्ञतर्पणादिकं कुर्यात् यद्वा दे
वं संपूज्य तीर्थेन वैश्वदेवांते ब्रह्मयज्ञतर्पणं कुर्यात् स्मृत्यंतरेषु कालस्य विधानादि संक्षेपवि
स्तरस्तु ग्रंथांतरे द्रष्टव्यः प्रकृतमनुसरामि ३०॥ गायत्र्या संध्या गायत्र्या त्रिगुणं यथा स्या
त् तथा नारायणाष्टाक्षरं उत्पद्य द्वादशादिति प्रकारेण विष्णुं ध्यायेन्नैव उपांशुपठेदित्यर्थः
उत्तरत्र रतिकर्तव्यतां सन्नयन्निति कर्मक्रममाह जपादि सूर्योपस्थानं कृत्वा तदुपरि पार्षदां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुलरिभक्तिलेनतद्भस्यादिगुणोपेतान् दिग्देवेभ्यां च्यां इंद्रं तर्प्पयेच नित्रैः तिलस्तर्प्पयेच प्रतीच्यां
३० वरुणं तर्प्पयेत् वायुं तर्प्पयेच उदीच्यां सोमं तर्प्पयेच ऊर्ध्वायां वीद्रकामो तर्प्पयेच ब्रह्मवायुतद्वा
भार्येच उर्ध्वायां शेषमित्रौ तर्प्पयेचाक्काम शेषौ चतर्प्पयेच षट्प्रश्नभाष्परीत्या अवांतरस्यां
अग्निं विनायकादान् यद्वा स्मृतं तरोक्तान्न्याचाप्रणम्य संध्यांते स्वगोत्रोच्चारणपूर्वकं
स्वनामोच्चार्य स्वात्मांतर्गतं हरिं शिरसा मारं वा स्मृत्वा स्वपादौ भूमिं वा स्पृष्ट्वा नत्वा हरिपार्षदा
न्गुरूंश्च विप्रांश्च पितृमात्रादींश्च प्रणम्य सर्वत्र सर्वोत्तमं विष्णुं ध्यायन्नेव हरिमर्चयेत्

गायत्र्या त्रिगुणं विष्णुं ध्यायन्नष्टाक्षरं जपेत् प्रणम्य देवान्विप्रांश्च गुरूंश्च
हरिपार्षदान् ३१ एवं सर्वोत्तमं विष्णुं ध्यायन्नेवार्चयेद्धरिं ध्यानप्रवच
नाभ्यां च यथायोग्यमुपासनं ३२ श्री॥ मनोवाक्कायकर्मभिः प्रातः कालेपूजां कुर्यादित्य

र्थः एवं पूर्वोक्तरीत्या सर्वत्र विष्णुं ध्यायन् यद्वा पाताले मत्स्यद्वीसादिब्रह्मांडव्याप्तविराण्मूर्तिं
ध्यायन् कुचित्स्वदेहांतर्हृदयावकाशे इत्युक्तरीत्या स्वामीष्टदेवतां प्रणम्य ध्यानं कृत्वा वेदशा
स्त्रादेरध्ययनादिरूपप्रवचनं कृत्वा यथायोग्यं स्वाधिकारस्वशास्त्रानुसारेण श्रीहरिं ज्ञेयं
कुर्यादित्यर्थः यद्वात्रसारोक्तरीत्या ध्यानप्रवचनाभ्यां च कुर्यान्नित्यमुपासनं अप ३०
रोक्षदृशैरेवयस्मान्मोक्षो न चान्यथा अपरोक्षदृशिश्चैवश्रवणान्मननादनु सम्यग्ज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चिततत्वस्य निदिध्यासनया भवेत् ॥३॥ निदिध्यासा च संप्रोक्ता विच्छ्याशास्त्रावमर्शनं ॥ एवं ध्या
नं हरेरन्यत्र स्वार्थं स्त्रैशो निश्चितं ॥४॥ यमश्च नियमश्चात्र प्राणायाम इतीरितः ॥ अहिंसासत्यम
स्तेयं ब्रह्मचर्यापरिग्रहौ ॥५॥ यथा शौचं तपः स्तुष्टिः स्वाध्यायो हरिपूजनं ॥ नियमा वीरपद्मं च स्वस्तिका
द्यानि चासनं ॥६॥ रेचकः पूरकश्चैव कुंभकश्च त्रिधा स्मृतः ॥ प्राणायामश्च विज्ञेय स्मरणं ध्यानमेव
च ॥७॥ प्राणायामस्मृतिं विद्धि वर्णिनां नियम उच्यते ॥ आधीतिः स्मृतियुक्ता हि निदिध्यासनमेव हि
अथ शौचं प्राणायामो निष्परिग्रहपूर्वकः ॥ तपश्चाद्याः क्रमात् सर्वे उत्तरोत्तरतोऽधिकाः ॥८॥ सर्वतः स्मरणा
त्स्यात्सुप्र साधने अज्ञस्य श्रवणं श्रेष्ठमयुक्ते मननं तथा ॥९॥ ध्यानं निश्चिततत्वस्य तस्माच्छा
स्त्रावमर्शनं वरं शास्त्रावमर्शनं ॥१०॥ वरं शतगुणं तस्माद्ध्यारव्येव स्य शतोत्तरा अप
रोक्षदृशाप्येषा कर्तव्या विष्णुमुखिदा ॥११॥ शौचासने त्वंगमात्रं तप थग्धर्मकारणं प्राणायामा
द्यस्तुष्टिपर्यंता द्विगुणाधिकाः ॥१२॥ स्वाध्यायस्तु कोटिगुणस्ततोऽनंतगुणो हरेः ॥ पूजा न द्विगुणं ध्या
नमिति धर्मक्रमः स्मृतः ॥१३॥ उत्तराधपदारूर्ध्वं विभागे नेति च त्रिधा ॥ आसनं त्रमुद्दिष्टं मंत्रस्म
रणपूर्वकं द्विगुणोत्तरं रेचकादि षोडशादिक्रमेण तु ॥१४॥ मंत्रो नादः स्ववर्णस्य कालो मंत्रेति
शब्दिते क्रमेणैवाभ्यसेन्मंत्रात्वथिमेकाग्रधीपुनः ॥१५॥ रेचयित्वा दक्षिणतः पूरयित्वा च वा
मतः कुंभकश्च सुषुम्नायां विष्णुं वायुं च संस्मरेत् ॥१६॥ मूलाधारं समारभ्य साम्र ध्यानमजुष्टि
ता मध्ये सुषुम्ना हि ज्ञेया वज्रिमकाश निवेस्तुता ब्रसनाडी तु या प्रोक्ता सैव पंचविधादिनी

११

पत्र वामाग्रदक्षांतर्भेदास्तेषु क्रमेणतु हरिर्नीलसीलपिंगलोहितश्चात्रकेशवः १८ प्रत्स्वम्रा
दिस्वरूपेणध्येयः सिद्धिमभीप्सता मूलेचनाभौहृदयेदमौनि भ्रमध्यमधद्विषडंतकेषु चतु
षट्दुद्विचतुर्भिर्द्विषष्ठदलेषु पद्मेषु सितारुणासु १९ पंचात्मकोसौभगवान्सदैवध्ययेहृदंतान्यरु
णानितानि त्रिकोणवन्हौचषडस्त्रवायोद्विस्तावस्त्ररविकुनशशि त्रिवन्हो २० वत्ताचिधावपिस
चिंत्यमिदंदशार्धरूपंशितंतदखिलंहृदयासरस्थां ईषाचपिंगलाचैववज्रकाधारणीतथा
सुषुम्नायचतुर्दिक्षुवज्रिकाद्यासुततत्रच चतुर्मूर्तिसभगवान्हृदयेसव्यवास्थितः २१ द्वा
सप्ततिसहस्राणांन्यास्तत्प्रधानतः वल्लीसहस्रस्मृतीनामचांवाच्योहिकेशवः २२ रवं
डस्मृतिधरिपास्यादेस्यादखंडाध्यानमुच्यते अप्रयत्नासमाधिस्वदर्शनाचिरकालतः
अथवासततंशास्त्रविमर्शेनभविष्यति परमस्नेहसंयुक्तंयथार्थज्ञानतोभवेत् २४ सा
भक्तिरितिविज्ञेयासाधनंभोगमोक्षयोः मुख्यमेषैवनान्यास्यात्सर्वानार्थंतयाविना २५
सच्चिदानंदरूपात्मेतिमानुषैस्तत्सुरेश्वरैः यथाक्रमंवक्तुगुणैर्ब्रह्मणात्वरिचितैर्गुणैरिति
ध्यानं मंत्रोमंत्रार्थवचनंमन्यस्यस्यात्सनोपिवा सर्वकर्मसमर्पणसकृतंध्यासर्वकर्मासमर्कौ
तथा सत्यंतपसिवाचीर्णसर्वकर्मफलंभवेत् स्वाध्यायेप्रवचनेस्यंतर्भावोविशिष्यते२७ १३
कृतंयथार्थविज्ञानंसत्यंतत्पूर्विकाकृतिः ध्यानसत्येपूज्यापूज्यातपस्त्वाभिधीयते२८
स्वाध्यायो वेदादिपाठःप्रवचनंव्याख्यानं जपेनैवतुसंसिध्येत् ब्राह्मणानात्रशायः
सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्यादन्यत्र वा कुर्यान्मैत्रो ब्राह्मण उच्यते सम्यग्ज्ञात्वैव यो विष्णुं व्याख्यायीत जपेत वा नतस्य
किंचिदकृतं कर्तव्यमुच्यते च सः इत्यादि तन्त्रपि साध्ये ३२॥ धर्मेणायाजनसत्प्रतिग्रहादि धर्मेणाग्नि
ष्टोव धर्मेणेज्यासाधनानि साधयित्वा विधानतः ध्यात्वा संपूजयेद्विष्णुं वेदतंत्रोक्तमार्गतः ३३
लोकयावदर्थादि वर्णाश्रमादिविहितवृत्त्या इज्यसाधनादीनि पंचमहायज्ञदेवपूजासाधनभूता
नि द्रव्यधान्यफलपुष्पाणि शाकादीनि संपाद्य माध्याह्नकाले विधानतः शौचाचमनं कृत्वा संक
ल्प्य अक्षौम्यामित्यादिमंत्रपूर्वकं मंत्रस्नानं वाराहे उक्तरीत्या वारुणं स्नानं कृत्वा अशक्ति
पक्षे उष्णोदकेन वा वेदोक्तमार्गेण पुरुषसूक्तगतैर्मन्त्रैः षोडशोपचारैः पूजयेत् पूज्यश्च
भगवानिति तंत्रसारोक्तमार्गेण शालग्रामादिषु स्वयंव्यक्तेषु नाचात्मभक्तिः पूर्वकं पाद्या
दिषोडशोपचारैः पूजयेदित्यर्थः तदुक्तं गीतादौ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः
स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्म
णा तमभ्यर्च्य सिद्धिं विंदति मानवः यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः तदर्थं क
र्म कौंतेय मुक्तसंगः समाचर यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः भुंजते ते त्वघं
पापा ये पचंत्यात्मकारणात्॥ यज्ञेन यज्ञमयजंत यज्ञो यज्ञपतिरित्यादिवाक्याद्यज्ञो
विष्णुः तत्पूजात्मककर्मणोऽन्यत्कर्म बंधकमित्यर्थः विष्णोरर्थे करिष्यामि आलोरा
मिदं दाभिच नाच्यार्थमिति वै क्वापि वदन्कर्म करोति यः श्रुतिस्मृतिहारे राज्ञेतस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हमनुगः सदा तस्मादाज्ञाधरो भत्वायवज्जीवं वसाम्यहं ॥ इतिजानन्नूसदा कुर्वन्न् ध्यायेद्धि
१२ ष्णुमतंद्रित ॥ इतियुपुराणे ॥ ॥श्लोक वैश्वदेवं बलिं चैव कुर्यान्नित्यं तदर्पणं इष्टं दत्तं हुतं ज
गत्पूर्त्तंयाआत्मनः प्रियं १४ दारान्सुतान्त्रयान्प्राणान् परस्मै सन्निवेदयेत् नित्यानि
यच्छंदपर्वोत्रेतचसंबध्यते नित्यं स्वज्ञास्वोक्तरीत्या वैश्वदेवं ह्वत्वा बलिहरणादिबलिं च
हुत्वा तदर्पणं विष्णोरर्पणं कुर्यात् स्वकुलसमपियज्ञादिकं विष्णोः समर्पयेदित्यादाइष्ट
मभीष्टं प्रजादिकं विष्णोः समर्पयेत् सर्वंदत्तं दानं हुतमौपासनादिकं जसंगायत्र्यादिमं
त्रैर्यज्जप्यितं पूर्तं वापीकूपतडागारामादिकं यष्ठव्यस्य सर्वत्रान्वयः आत्मनः स्वस्यप्रि
यं भोग्यमन्नपानादिकं प्रियं वित्तदारादित्रयविशेषणं पूर्वोक्तं सर्वं सर्वेत्कृष्टाय
हरये भक्तिज्ञानपूर्वकं स समर्पयेदित्यर्थः तदुक्तं स्वोचिते न च मार्गेण विष्णुपूजाम
तेषु केचित् नाप्रवृत्तिः प्रवृत्तिर्वा यत्र धर्मः स वैष्णवः तस्मीत्स्वर्थं विनान्यस्मै नादद्बिंदु
नतंदुलं दद्यान्निराशीश्च भवेत्सदा भक्तस्य केशावे हरे नैवेद्यशेषेण पंचयज्ञांस्तु
कारयेत् लौकिके वैदिके वाग्नौ देवेत्थं जुहुयाद्यविः अनुयागेऽप्यशक्तश्चेत्सोऽदशाज्यात्तु
लीयंजेत् क्रमेण पौरुषंसूक्तं व्याहृतिभिः समन्वितं पे‌‌ष्वदेवं ततः पश्चात्तुलसीदल १२
संयुतं विष्णुराकृतिमुत्सृज्य वैश्वदेवं करोतियः देवास्तेनगृह्णंति तस्य यज्ञोनिरर्थकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हविष्यंपचधात्कृत्वापूर्वंभागात्षडाहुतिः हविष्यत्द्वितीयाच्चतुर्थ्यादुच्छभस्मनि द्वौ
भागत्रोषोस्तमज्यधर्मादीनांबलिंहरेत् अग्निदानंदेवयज्ञंभूतयज्ञंतथैवच भागात्
तीयस्पितरंहव्यदानेचतुर्थंकुल पंचमान्मानुषोयज्ञोवैश्वदेवेत्वयंविधिः एवंतुविधि
नाकार्यंविष्णुस्मरणपूर्वकं तत्रागतेभ्योन्नंदीयीतस्वस्यशक्त्यनुसारतः अनुधृतंबलिं
दृष्ट्वाप्राणायमत्रयंचरेत् स्वमुधरान्नस्तत्रप्राजापत्यंसमाचरेत् गवांग्रासंचकृत्वस्तं
नित्यमेवनसंयः॥ग्रस्थोवैश्वदेवार्थंकर्मप्रातस्तेदिवा॥अन्नस्यचात्मनश्चैवसंस्का
रार्थमिहेष्यते॥यस्नात्वाशीमलंभुङ्क्तेअजपीपूयशोणितं अहुत्वोचक्रिमीभुङ्क्ते अ
नाविध्यभोजनः॥श्रवणंकीर्तनंध्यानंहरेरद्भुतकर्मणः॥जन्मकर्मगुणाचारस्तदर्थे
खिलचेष्टितं॥श्लोक इष्टंदत्तंहुतंजप्तंपूर्तंयच्चात्मनः प्रियं दारास्सुतान्प्रियान्प्राणा
न्परस्मैसंनिवेदयेत् १५ ॥इति एकादश स्कंधे तदतत्पुत्रात्स्त्रियोमित्रास्त्रेयः
सर्वस्मादांतरंयदयमात्मा प्राणदेहमनः आत्म देहापत्यधनादयः यत्संपर्कात्
प्रियाआसन्ततः कान्त्वपारप्रियः हेहरेसर्वोत्तमत्वदीयामेकांभक्तिंनममस्थिरांचि
दितिज्ञानंनिवेदनं आसनाद्यनुयागांतं अर्चनंयन्मयाकृतं भोगहीनंक्रिया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हीनं मंत्रहीनमभक्तिकं तत्सर्वं क्षम्यतां देवा दीनमात्मनिसा कुरु नित्यं किंकरभावेन स्वात्मानं
३२ विनिवेदयेत् इति पंचरात्रागमे श्लोक् भुक्तशेषं भगवतो भक्त्यातिथिपुरःसरः ३५ भुंजीत तद्गतं वि
ष्णोस्मरंस्तद्गतमानसः टी० प्रत्याब्धनाद्दिनापोष्याः अतिथिः पुरःसरो मुख्यो येषां ते तथा ते पोष्या
यस्य स तथा अतिथिब्राह्मण मातपित्रादि बहुभिः पोष्यैः सहितः स्वयं तद्गतं विष्णुं स्मरन् संकर्ष
णप्रद्युम्नरूपेण हृदि स्थितं भुक्तमिति तद्गतमानसः भोजनसमाप्तिपर्यंतमुपाध्यायन् हरेर्भुक्तशे
षमेव भुंजीत नान्यदित्यर्थः तदुक्तं परलोके फलं नाकिंचिद्दीयते यश्च नादिकं तद्धि प्राप्य प्रदातव्यम
क्षयं फलमिच्छता १ पोष्यवर्गसमोपेतो भुंजीत सह बंधुभिः कवले कवले कुर्वन् गोविंदस्यानुकीर्त
नं २ नित्योपवासी विज्ञेयो भुंजानोपि हि जोत्तमः जंब्वादिपत्रावल्यां परिवेषरिवेष्टितमन्नादिकं प्राश्नु
यत्वादिनापीठादानुपविश्यगायत्र्या प्रोक्ष्य परिषिच्य चित्राहुतीर्दत्वा संकर्षणाय प्रद्युम्नाय प्राण
वरुत्र बुध्यातु भोजनो ऽश्यतः पिबति नित्यादिकं स्मृता अमृतोपस्तरणमसीत्यपः पीत्वा प्राणाहु
तीरनिरुद्धादिकान्स्मृत्वा कुर्यादिति श्लोक् आचम्य मूलमंत्रेणाकोष्टं स्वमभिमंत्रयेत ३६ वेद
शास्त्रविनोदेन प्रीणयन्पुरुषोत्तमं अतःशेषं नयेत्संध्यामुपासीताथ पूर्ववत् ३७ टी० भुक्त्वापा ३३
ण्यादिप्रक्षाल्याचम्य स्वकोष्टं दुदरं मूलमंत्रेण यथाशक्ति अभिमंत्रयेत् ततः वेदशास्त्रा
णां विनोदेन अध्ययनाध्यापनादि यथास्त एवं विचारेण पुरुषोत्तमं प्रीणयन् प्रसादयन् अतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेषं दुर्वरितदिवसभागं नयेत् क्रमेण सपामप्पायुष्यं वृथा न कुर्यादिति यावत् । अनंतरं
सूर्य अस्तमये संध्यामुपासीत कृथं पूर्ववत् प्रातःसंध्यावदनवसर्वं कुर्यात्स्वशाखोक्तरी
त्येत्यर्थः श्लोक यामास्परतएवाथस्वपध्याय जनार्दनं १८ अंतरा केतलोबुध्वा स्मरेतव
दुश्चोत्हरिं ॥ अथसायमौपासनानंतरं वेदादिव्याख्यानादिना दुष्टजनसंहारकं शिष्टजनपरि
पालनात्मकं हरिं स्मरन्नेव यामात्परतएवस्वपेत् न पूर्वमित्यन्वयः अंतराले स्वापमध्यकाले
बुध्वाप्रयत्नेन प्रबोधं संपाद्यबहुशः बहुवारं हरिं सकलाथसरिहारं इष्टप्रदं सख्यादि
क्रीडाकरं संसारादुद्धारकं गुणसंकीर्तनपूर्वकं चिंतयेदित्यर्थः स्वकर्मादिकं कर्म हरये
समर्पयेदित्याशयेन तदर्थकं भागवतश्लोकं पठति श्लोक कायेन वाचा मनसेंद्रियै
र्वा बुध्यात्मनावानुसृत स्वभावात् करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये
तत् १९ इति प्रातरारभ्यरात्रियामपर्यंयत्कर्मकायविहितं करोति सालग्रामादिकं वाचा
कृतं स्तोत्रादिकं मनसा कृतं ध्यानादिकं इंद्रियैर्ज्ञानेंद्रियैः कृतं श्रवणदर्शनादिकं
मदंत्राकं बुध्याकायादिविवेकज्ञानेन कृतं स्वभावं स्वतंत्रपदार्थमूलं श्रीहरिमनु
सृतः सन् आत्मनाजीवस्वभावादिना यद्यत्कृतं तत्सकलं परस्मै सर्वोत्तमाय
नारायणाय समर्पयेत् इदं सर्वं तत्प्रेरणया तत्प्रीतये भवत्विति ब्रूयादित्यर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मणा निरपेक्षेण विहितप्रीतिकारेणाच सम्यक्ज्ञानंभवेपुंसि दैवतात्मलाभपूर्वकं ॥ निर्देशा
द्भगवत्सेवनत्मात्सुर्दैवतायतः तदंगत्वेन निर्देशात्स्वेषु प्रतिमादिषु २ तेषु तत्तेषु देवे
३६ शे विद्वेषोचोत्पद्यते परं ज्ञानं तेनैव सम्यक्तु मुच्यते कर्मपीडनात् २ इति गीतातात्पर्ये ॥ ॥
श्रीहरेः सर्वोत्तमत्वं स्वतंत्रं तदन्यस्य सर्वस्य तदधीनत्वात्तद्भक्त्यादि पूर्वकं तत्प्रीत्य
र्थं स्वविहितं कर्म कार्यं नान्यदिति यदत्र यथाभिमतं तत्र्यर्थं गीतादिवाक्यानि संति ता
नि पठंति ॥ श्लोक द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः सर्वाणि भूतानि कू
टस्थोक्षर उच्यते २२ मौ प्राणप्रसिद्धौ पुरुषौ चेतनौ लोके ईशितव्यावंगेषु शास्त्रेण
अयत्नोच नेसति द्वावेवातौ आह क्षरश्च अक्षरश्चेति सर्वाणि भूतानि षेतन ब्रह्मा
द्यः सर्वे क्षरा उच्यते शरीरनाशात्तु कूटस्थ शरीरमात्राणि विकारचेतनो महा
लक्ष्मीरक्षर उच्यते यदर्थं पुरुषद्वयमुक्तं तदाह ॥ श्लोक उत्तमः पुरुषस्त्वन्यः परमात्मे
त्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः २९ य उत्तमः पुरुषः स्त्वतीयो
ऽस्ति स तु ताभ्यांभिन्नः न तु तयोर्मध्ये एकः स एव परमात्मेत्युदाहृतः परमात्मत्वमपि ३६
तः फलात्मापरमात्माचेत्यादि श्रुतप्रसिद्धस्यार्थः तस्योत्तमत्वे युक्तिमप्याह यो लोकत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमाविश्यधारणपोषणादिकंकरोतीतिसर्वाधारकत्वात् सर्वस्मादुत्तमइत्यर्थः॥
उअव्ययत्वात्तत्रप्रविष्टस्यापितन्नाशेनान्नोनास्तीसोत अव्ययइति तत्कथमितितदै
श्वर्यादिस्यात ईश्वरइति सचकइत्यत आह श्लोक यस्मात्सरमतीतोतमक्षरादपिचो
त्तमः अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः २२ अहंह्यहेयस्माद्धतोक्षरंब्रह्मादि
चेतनवर्गपर्यंतंचातीतः अतिक्रांतः अक्षरादपिलक्ष्मीचेतनादप्युत्तमः अतोहे
तोः लोकेशास्त्रेवेदेचप्रथितःपुरुषोत्तमः पुरुषोत्तमइति प्रसिद्धोभवदित्यर्थः स्वोक्ते
स्यसत्यत्वेतद्धेतुः फलमाह श्लोक योमामेवमसंमूढोजानातिपुरुषोत्तमं सस
र्वविद्भजतिमांसर्वभावेनभारत २३ इदमौपचारिकमिथ्याज्ञानहीनः असं
मूढः नरंमांहृष्टुंएवंरमाब्रह्माधारकत्वादुक्तप्रकारेणपुरुषोत्तमंजानातिसनरश्च
सर्ववित् सर्वज्ञः सर्वशास्त्रसुख्यार्थज्ञानवान् सएवसर्वभावेनसर्वप्रकारेणाऽप
एकालादावपि यद्वा सर्वकालेनपूर्णत्वेनसर्वसत्तादेस्तदधीनत्वात्सर्वशब्दवाच्योय
मित्यादिप्रकारेणमांभजतिसर्वविदित्युक्तंप्रमेयंगोप्यमित्याह इतीदमित्युक्तप्रमे
यगुह्यतमंअतीवगोप्यशास्त्रंशिक्षिणोयमयातवोक्तंभारतात्तत्वगोप्यत्वात्फलमाह॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५ श्लोक इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृ
त्यश्च भारत २४ एतन्मयोक्तं परोक्षतो बुद्ध्वा ध्यानं कृत्वा बुद्धिमान परोक्षज्ञानवान्त
तः कृतकृत्यो मुक्तः स्यादित्यर्थः अनेन हरेः सर्वोत्तमत्वादिज्ञानं पुरुषार्थहेतुत्वात्
संपाद्यमित्युक्तं भवति श्रीहरेः सर्वोत्तमत्वं च तारतम्येन ज्ञेयमित्यत्र प्रमाणमाह॥
श्लोक रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः ब्रह्मा मामाश्रितो नित्यं नाहं कंचि
दुपाश्रितः २५ अत्र देवेतरे रूपाख्याः रुद्रादिदेवानाश्रित्य वर्तंत इति ग्राह्याः॥ ब्र
ह्मा च मां लक्ष्मीमाश्रित्य स्थितः सा च लक्ष्मी मां हरिमाश्रित्य स्थितेति कृष्णवाक्य
त्वात् स्पष्टमन्यत् स्वोचितदेवताभक्त्यादिपूर्वकं विष्णोराराधनमेव परो धर्मस्त
त्र सर्वेप्यधर्म इत्यत्र प्रमाणमाह श्लोक ये मे मतमिदं नित्यमनुतिष्ठंति मान
वाः श्रद्धावंतोनसूयंतो मुच्यंते तेपि कर्मभिः २६ ये त्वेतदभ्यसूयंतो नानुतिष्ठं
ति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः २७॥ मयि सर्वाणि कर्मा
णि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः इति पू
र्वश्लोके कृष्णेन ममतयोत्तमत्वात् स्वाभिनिन्यस्तमनसा निर्ममकरोति कृष्णो ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्याचित्तानि सर्वाणि कर्माणि मयि संन्यस्य समर्प्य कर्त्तव्यमित्युक्तं तदिदं मम मत
व्यं ये मानवाः श्रद्धावंतः आस्तिक्ययुक्ताः अनसूयंतः असूयादिदोषरहिताः सं
तः अनुतिष्ठंति तदुक्तप्रकारेण मत्संमतं कर्म सदा कुर्वंतीत्यर्थः तेपि कर्मभिः करणैः
ज्ञानद्वारा संसारान्मुच्यंते किमु ज्ञानिन इत्येवार्थः अकरणे प्रत्यवायमाह ये तु अ
सूयादिदोषवंतः संतः ये तु पूर्वोक्तं मत्संमतं तदभिप्रेतं कर्म नानुतिष्ठंति न कुर्वंति॥ तां
नचेतसः अविवेकिनः सर्वज्ञानविमूढान् सर्वज्ञेयविषयमिथ्याज्ञानयुक्तान्
अतएव नष्टान् नरकयोग्यान् विद्धि जानीहि यदा चर्य्येत तमेव उदाहृतवत्तो।
नाचार्यवाक्यतात्पर्यं मम मतं मध्वशास्त्रप्रतिपाद्यं तान नंगीकुर्वंतः तेन नष्टा इत्यादि
ज्ञेयं विष्णुभक्त्यादिकं सज्जनानां स्वभावः नद्वेषादिकं दुर्जनस्वभाव इत्यत्र प्रमा
णमाह॥ श्लोक द्वौ भूतसर्गौ लोकेस्मिन्दैव आसुर एव च विष्णुभक्तिपरो दैवो वि
परीतस्तथासुरः २८ भूतसर्गौ भूतानां चेतनानां सर्गौ स्वभावौ द्वावेव लोके दैवो
आसुरश्चेति दैवशब्दो मुख्ययोग्यसज्जनवाचकः असुरशब्दो मुख्ययोग्यदुर्ज
नवाचकः तेन विष्णुभक्तियुक्ताः यथा असुराः विपरीतविष्णुद्वेषयुक्ता इत्यर्थः
सर्वविहितं विष्णुस्मरणायुक्तं चैव कार्यः न तद्रहितमेवेत्यत्र प्रमाणमाह॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३६

श्लोक स्मर्त्तव्यः सततं विष्णुर्विस्मर्तव्यो नजातुचित् सर्वे विधिनिषेधास्युरेतयो
रेवकिंकराः २८ सर्वदा विष्णुः स्मर्त्तव्य एव न कदापि विस्मरणीयः कुतः सर्वे विधयः स्म
रणस्य किंकराः सर्वे निषेधा विस्मरणस्य किंकराः क्रमेण स्मरण विस्मरण युक्ता एव वि
धिनिषेधाः फलप्रदाः नतद्रहिताः भत्याः फलदाने सामर्थ्याभावात् हरिस्मृतियु
क्तमेव विहितं कार्यं फलवदित्यर्थः हरिभक्तिपूर्वकृत एव धर्मो नान्यदित्यत्र प्र
माणमाह श्लोक धर्मो भवत्यधर्मोपि कृतो भक्तैः वाच्युत पापं भवति धर्मो
पि यो न भक्तैः कृतो हरे २९ हे हरे हे अच्युत तव भक्तैः प्रमादादिना कृतः
अधर्मोपि अधर्म एव सन्नीयमायमानोपि वा धर्मः धर्म धर्मतेतुर्भवति अ
ज्ञत्वाजारत्वादि एकादशी श्राद्ध परित्यागादिरित्यर्थः तव भक्तेन मम मतेयत्किं
चित हीनः कृतः धर्मोपि स्मृत्या विहितोपि यज्ञादि एकादशी श्राद्धादि वा पा
पं भवति पापफलं भवति भक्त्याभोगात् मुमुक्षुणा हरिभक्त्यादि युक्त मे
व सर्वं विहितं कार्यमित्यत्र भगवद्वाक्यं प्रमाणमाह श्लोक मन्मना भव ३६
मद्भक्तो मद्याजी मां नमस्कुरु नित्यं भवेच्च मन्निष्ठो बुभुक्षुः पुरुषस्तथा ३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योबुभत्सुः बोद्धुमिच्छन् मुमुक्षुरिति यावत् तत्पुत्तं अधिकारिषु मन्मनाः भगवद्
ह्रेमनाः मयि भक्तिमान् मद्याजी मद्विषयकयागवान् मामेव नमस्कुरु एवं नित्यं मन्निष्ठो
मदासक्तो भवेत्यर्थः सोक्तसदाचारविषये अधिकारिणमाह एषः पूर्वोक्तसदाचारः सदाश्रि-
यमाणः आचारः शौचाचमनस्नानादिः भक्तिः यतेर्विशेषमाह तिथापर्यंतः कर्मसमुदायः अ
स्वैश्वदेवं बलिं दंतधावनं चाप्रते बटोः १ एष नित्यः सदा रोग हीणो वनिनस्तथा ३ २१
हस्थस्य वानप्रस्थस्य च नित्यः नियमेन कर्तव्यः सदाचारमध्ये वैश्वदेवं तदा स्वकर्म बलि
लिहरं स्वकर्म दंतधावनं चाप्रते इतर सर्व बटोरपि नित्यं कार्यं यते विशेषमाह ॥ श्लोक
एवमेव यतेस्त्वीय वित्तेन तु विना द मूलमंत्रै सदा स्नानं विष्णोरेव च तर्पण २२ यतेः
संन्यासिचतुष्टयस्य स्वियवित्तेन विना तु एव स्वार्जितवित्तं विना एवमेव नित्यः वैश्वदेवं बलिं
च विना परदत्तेन द्रव्येण दंतधावनं देवपूजनादिकं सदा कार्य मित्यर्थः प्रणवाष्टाक्षरादि
मूलमंत्रैः स्नानं कार्यं विष्णोरेव तैरेव मंत्रैस्तर्पणं कार्यं श्लोक विशेषोन्निक्रियते रजलांज
लिनाथा तर्पणं तु तरे रेपतेरन्यस्य चोदितं २२ यति चतुष्टयमध्ये निष्क्रियतेः परमहं
सस्य विशेषोस्ति तमाह अजलांजलिना अजलः जलहिनः अजलिः यस्य सः अजलांज
लिना तथा नियतो जलांजले एवं विधतर्पस्या भावः न हि तस्य तर्पणाभावः प्राप्तिः रस्तत आह।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्पणं तु तैरेव स्वाश्रमोक्तरीत्या कार्यं नान्यस्य देवादितरस्येत्यर्थः अन्यस्य यतेर्लक्ष्मादित्रयस्य उद्दितं सर्वं कार्यमि
३७ त्यर्थः यद्वा यतेरन्यस्य गृहस्थादेर्ब्रह्मादितर्पणं विहितं जलेन तर्पणं नित्यतर्पणादिकं कार्यमिति सिंहावलोकनन्यायेन
विशेषो विज्ञेयः एवं चन्दनं उपसंहरति स्व श्लोकः समिधोमो वटो श्चैव स्मृत्वा विष्णुं तु लाञ्छने सर्ववर्णाश्रमैर्विष्णुरेक एवे
ज्यते सदा ३४ रमाब्रह्मादयस्तत्परिवारतया वत्तु ७ तुलाञ्छनैर्गोविष्णुं स्मृत्वा समिधोमः अग्निकार्याख्यः वटो
विशेषः आचारः कार्यः एवं पूर्वोक्तरीत्या सर्ववर्णाश्रमैस्तु वर्णिभिः चतुराश्रमिभिश्च विष्णुरेक एव सदाव
ज्यते पूज्यते पूजनीय इति यावत् तस्य विष्णोः परिवारतयैव परिवारत्वेनैव तद्भक्तत्वादिना रमाब्रह्मादियो देवाः
सदा पूज्यंते पूजनीया एवं न स्वातंत्र्येणेत्यर्थः वैष्णवान्येव कर्माणि यः कुरोति सदा नरः जपार्चामार्जनादीन्यात्र
मोक्तानि यानि च ९ सततं कुर्मेति विज्ञेयो ह्यन्यदेवादिपूजनं कुत्तरावर्षं पंतिसत्तु तद्योगमाक्चवान् २ इति
गीतातात्पर्ये ॥ यस्तु नारायणादन्यं स्वातंत्र्येण प्रपूजयेत् मनेयुर्निष्फलास्तस्य यज्ञदानादिसत्क्रियाः ३ ऐं
ग भावेन देवानामार्चनं न निषिध्यते तस्माद्ब्राह्मणो नित्यं प्रयत्नेनार्चयेद्धरिं ४ तदाचरणभेदेन परितो
देवतायजेदिति वासिष्ठे हरिस्मरणपूर्वकं कर्म कार्यमित्युक्तं तत्र स्मरणीयस्य हरेर्गुणादिकं भगवद्वाक्यप
ठति श्लोकः कविं पुराणमनुशासितारमनोरणीयांसमनुस्मरेद्यः सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तम
सः परस्तात् ३५ ॥ कविं सर्वज्ञं पुराणं पुरातनं अनुशासितारं सर्वस्य शिक्षकं सर्वस्य धातारं पोषणकर्तारं
अणोरणीयांसं सूक्ष्मादपि सूक्ष्मं अत एव अचिंत्यस्वरूपं साकल्येन वाङ्मनसामगोचरं आदित्यवर्णं उदयद्
स्करवर्णं यद्वा पूर्णं तमसः अज्ञानात्स्वतेवामित्स्यार्थापरस्तात् गतं तदाधारविहितं विष्णुं यः सदास्मरेत स ३७
विष्णुपदं स्तमाप्नोति पूर्वेणान्वयः स्मरेत्युक्तार्थं स्मृतिमप्याह वेदाहमेतं पुरुषं महान्तं ॥ ● अयनायविस्मृते ॥
वेदादस्य योग्य प्रथानादियो वाक्य पुरुषाभिप्रायनिवेशनस्य प्रमितत्वादलंपूर्णप्रज्ञाचार्योक्तो वेदपुरुषो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा एतं सहस्रशीर्षेत्यादिपुरुषसूक्तप्रतिपाद्यं आदित्यवर्णं तमसः प्रकृतेस्त्यादेः पारेतु एव दूरत एव
संतं निर्दोषं महांतं सर्वोत्तमं पुरुषं पूर्णषड्गुणं नारायणं वेद अपरोक्षतो जानामि पुरुषः पुनः श्रीहरिरस्य
तत्त्वाहं सर्वाणीति यत धीरः बुध्यादिषु रममाणः पुरुषः सर्वाणि रूपाणि ब्रह्मादिचेतनाचेतनस्वरूपाणि वस्तू
नि सम्यक् सृष्ट्वा तेषां नामानि कृत्वा नाममध्ये यानि वेदादिसिद्धानि तेषां दत्वा तेन परार्थं तत्तन्नामाव
रं व्यवहरन् आस्ते वर्तते अहमेतं वेदेति पूर्वेणान्वयः विश्वाय अन्यस्य ज्ञानेति धत्तेति धाता ब्रह्मा पुरस्तात् पू
र्वं लोके स्थितं यं पुरुषं उदाजहार उक्तवान् इति व्याहृतवान् तथा च तत्त्वाः प्रदिशः चतुर्दिक्षु परार्थान्प्रविद्वान्
सम्यगेव ज्ञात्वा शक्रोपि यमुदाजहार यद्वा धाता यं ज्ञातवान् तं प्रतिपदिदेश शक्रोपि चतुर्दिग्व्यवस्थितप्रा
णिनः प्रतिपदिदेश ज्ञात्वा एनं पुरुषं एवं पूर्वोक्तरीत्या विद्वान् परोक्षज्ञानी जानन् अधिकारी इह संसा
रबंधेषु वा मुक्तिरूपाने वाऽमृतो भवति मुक्तस्तथास्ते भवति स स्यति सृष्ट्यप्रत्ययाद्भवति वा अयनाय
मोक्षाय पुरुषसूक्तार्थप्रतिपादितगुणविशिष्टनारायणापरोक्षः ज्ञानादन्यः व्यतिरिक्तः पंथा न विद्यते ना
स्ति स्वकृतग्रंथे क्षिप्रप्रत्ययार्थं स्वस्यैव वैशिष्ट्यमापत्त्यं च ज्ञातयितुं स्वग्रंथस्य विषयादिकं वाक्यमात
आनंदतीर्थमुनिना व्याससवाक्यसमुद्धृतिः सदाचारस्य विषये कृता संक्षेपतः शुभा ६०॥ आनंदस्वतेरः
आनंदरूपप्रतिपादकं आनंदरूपमोक्षसाधनं भवतीत्यर्थः शास्त्रं येन कृतं सत तथा सम्यक् आनंदोय
स्य यस्मादिति वा आनंदरूपतीर्थरूपतीर्थरूपश्चासावासौ मुनिश्चेति स आनंदतीर्थमुनिः स्वाकृतस्य सदा
क्रियमाणस्य आचारस्य विषये इति कर्तव्यता विषये गीतादिवेदादिरूपाणां व्यासवाक्यानां समुद्धृतिः
संक्षेपतः कृता शुभा मोक्षादिमांगल्यप्रदा ग्रंथे सज्जनप्रवृत्तिहेतुभूतं विषयादिकं दर्शितं भवत्यनेनेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञेयं एवं सः तद्ग्रंथोक्तः हृतः सदाचारो वैराग्यभक्त्यादिद्वारा मोक्षप्रदायको भवतीत्युक्तं भवति समापितग्रं
थो भगवत्प्रसादेन ते शिष्यशिक्षणयांते पि श्रीनारायणस्तुतिकृत्यात स्त्री सैश्वासनं करोति ७॥ अशेषकल्याणगुण
३८ नित्यानुभवसत्तनुः ॥ अशेषदोषरहितः प्रीयतां पुरुषोत्तमः॥ ८० ॥ अशेषाणां कल्याणानां मंगलानां गुणानामानंद
ज्ञानेच्छाप्रयत्नादिगुणानामनंतानां नित्यानुभवभोगरूपाः संति तु तमात्मतनुर्यस्य सतथा अशेषदोषैः जन
नादिभिः रहितः ॥ अतएव पुरुषोत्तमः सर्वगुणपूर्णैः सर्वदोषरहितात् हीनः क्षराक्षरपुरुषाभ्यामुत्तमो नारायणः
प्रीयतां अस्मदादिसज्जनानामिति सिद्धत्वान्नाचक्रायद्वासंनिहितार्थनिमित्तेनानेन ग्रंथेन प्रहृष्टत्वात् नः पुरुषो
त्तमः प्रीतेभ्यः पुनरातिशयेन प्रीतोस्तु इत्यर्थः इत्यशेषमतिमंगलं ॥ ८७ ॥ अपि च हरिणा मध्वव्याख्यार्थविवृ
तिः कृता प्रीयतां भगवांस्तेन मध्वाचार्यगतो हरिः १ ॥ तच्छिष्येण तदाख्येन पद्यार्थैश्चविधीयते कृष्णापुरी
त्युपाख्येन तदनुज्ञानवह्निधीः २ आयी से नहुस्य मातासर्वेषां मातृस्थिता सर्वार्थप्रत्यभिज्ञाना प्रत्य
यार्थाभिधाच्चयः तेन चायी स्वपाख्येन न पूर्वहरिणा कृता सदाचारस्मृतिव्यान प्रीतो मध्वगो हरिः ४ ॥
संदंशादिव्याहरणाद्यमलादिगुणलंभरः आयर्व कर्नाटकभाषायी ० इति श्रीसदाचारस्मृतिसटीका समाप्तः
श्री कृष्णार्पणमस्तु ॥ शके १८९१ प्रमाथिनाम वत्सं० श्रीहरिगुरुचरणारविंदार्पणमस्तु ॥ श्रीनरसिंहार्प ॥ ७
हस्ताक्षर जयतीर्थसुत श्रीनिवास आपस्तंब काश्यपगोत्री बेदूर ग्रामोपाध्यायस्येदं पुस्तकं स्वार्थपरार्थः ॥
॥ श्रीमद्गुर्वंतर्गत भारतीरमणमुख्यप्राणांतर्गत श्रीरामकृष्णहयग्रीववेदव्यासात्मक श्रीलक्ष्मीनारायणा श्री
र्पणमस्तु ॥ श्री हनुमते नमः श्री भीमसेनाय नमः श्री मध्वराजाय नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=10.08.20 16:57
,TRANSFERRED=2020/08/10 at 17:03:44
,PAGES=37
,TYPE=STD
,NAME=S0003461
,Book Name=M-2736-SADACHAR SMRITI STIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection